- Title – श्रीमद् भागवतपुराण (भावार्थटीका
- Accession No – Title –
- Accession No – /
- Folio No/ Pages – 29 | 58
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – मायात: नयः प्रोक्त: सप्तमेयत्र गीयते
- End – सर्वहिरण्मयं शोभमासीत् ।
- Colophon-
- Illustrations -
- Source -
- Subject - पुराण
- Revisor -
- Author -
- Remarks- अपूर्ण है।

श्री॰
भाग॰
टी॰
२

मांधातुः रन्वयः प्रोक्तः सप्तमे यत्र गीर्यते पुरुकुत्सस्य चाख्यानं हरिश्चंद्रस्य चोत्तमं १ पुत्रप्रवरः पु
त्रश्रेष्ठः स पितामहेन युवनाश्वेन प्रवृतः पुत्रत्वेन स्वीकृतः अतएव तस्य मांधातृप्रवरत्वं तत्सुतः १
एते युवनाश्वांबरीषहारीता मांधातृगोत्रस्य प्रवराः प्रवरान्तरविशेषप्रवर्तकाः यद्वा यौवनाश्व
विशेषणं पितामहेन मांधात्रा सह ऋषिवर्यत्वेन प्रवृतः मांधाता प्रवरो येषां ते इमे अंबरीषयौ
वनाश्वहारीताः तथाहाश्वलायनः हारितकुत्सपिंगदर्भभैमगवानामांगिरसांबरीषयौ

मूलं॰ मांधातुः पुत्रप्रवरो योंबरीषः प्रकीर्तितः पितामहेन प्रवृतो युवनाश्वेन तत्सु
तः १ हारीतस्तस्य पुत्रोभून्मांधातृप्रवरा इमे नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः २
तया रसातलं नीतो भुजगेंद्रप्रयुक्तया गंधर्वानवधीत्तत्र वध्यान्वै विष्णुशक्तिधृक्
३ नागाल्लब्धवरः सर्पादभयं स्मरतामिदं त्रसद्दस्युः पौरुकुत्सो योनरण्यस्य देहकृत
हर्यश्वस्तत्सुतस्तस्मात्प्रारुणोथ त्रिबंधनः तस्य सत्यव्रतः पुत्रस्त्रिशंकुरिति विश्रुतः ५

वनाश्वेनेति मांधातारं केचिद्वदंति २ अंबरीषो गिरसो मांधातुर्वरीषयौवनाश्वेति पुरुकुत्सस्य
कथयिष्यन्नादौ तावत्तस्य प्रभावं विवाहं चाह उरगैर्भ्रातृभिर्दत्ता या नर्मदा २ तया च वध्या
नवध्यार्हान् ३ स च पुरुकुत्सो नागाल्लब्धवरोभूत् वरमाह इदं नर्मदाया रसातलनयना
दिकं स्मरतां सर्पादभयमिति देहकृत् पिता त्रसद्दस्योः हतोऽनरण्यस्य इति ४ अथ श्लोकत्र
यं त्रिबंधनः त्रिबंधनो यस्य सो त्रिशंकुः तं केचित् हरिश्चंद्रो पितृशापादि तो चंडालत्वं प्राप्तवंत

नवा ऋषीकितीयोगाश्रितपतनोपितक्रमतः

संगात्सौभरिर्व्रतस्य योऽहं तस्य ब्रह्मस्तनयः ५० मिथुनव्रतिनां दांपत्यधर्मवतां वनयदि संगपतन
दिनव्रतिषु ईश्वरार्थधर्मपरेष्वेव कार्य इति शेषः ५१ संगजातं दोषं प्रपंचयति एक इति पंचाशता
भार्याभिः संबंधात्पंचाशत् आसं अभवं भूवमित्यर्थः ततश्च तैः पंचसहस्रसर्गः आसं एकं ता

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य अंतर्जले वारिचरप्रसंगात्प्रच्यावि
तं ब्रह्म चिरं धृतं यत् ५० संगं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिं
द्रियाणि एकश्चरन्रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः ५१ एकस्त
पस्व्यहमथांभसि मत्स्यसंगात्पंचाशदासमुत पंचसहस्रसर्गः नांतं व्रजाम्युभयकृत्यम
नोरथानां मायागुणैर्हृतमतिर्विषयेऽर्थभावः ५२ एवं वसन्गृहे कालं विरक्तो न्यास
मास्थितः वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ५३ तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्षणम्
आत्मवान् सहैवाग्निभिरात्मानं युयोज परमात्मनि ५४ ताः स्वपत्युर्महाराज निरीक्ष्याध्या
त्मिकीं गतिं अन्वीयुस्तत्प्रभावेण अग्निं शांतमिवार्चिषः ५५ इति श्रीभागवते नवमे ष
ष्ठोऽध्यायः ६ ॥

सपुत्रशतरूपेणोत्पत्तेः उभयकृत्यानि ऐहिकपारत्रिकाणि कर्माणि त
द्विषयाणां मनोरथानां अर्थभावः अर्थबुद्धिमान् ५२ आत्मनोऽग्निसंगमात्प्राग् एव तानप्यस्य धर्मरत्यर्थः
५३ ५४ आध्यात्मिकीं गतिं ब्रह्मणि लयं ५५ इति श्रीभावार्थे नवमस्कंधे षष्ठोऽध्यायः ६ ॥

१९ प्रलंभितो वंचितः हे असति असंमतं अनभीष्टं २० हे सती कुलप्रसूते ते मतिरन्यथा तद्विपा
र्य्ययेणावगताश्चवसंता अथ च वसितेति वा तदेवाह कुलदूषणमिदमित्यादि २१ २४ सप्य

यजमानोप्यशर्यातिश्च्यवनस्याश्रमंगतः ददर्शदुहितुःपार्श्वेपुरुषंसूर्यवर्चसं १८
राजादुहितरंप्राहकृतपादाभिवंदनं आशिषश्चाप्रयुंजानोनातिप्रीतमनाइव १९ चि
कीर्षितंतेकिमिदंपतिस्त्वयाप्रलंभितोलोकनमस्कृतोमुनिः यत्त्वंजराग्रस्तमसत्य
संमतंविहायजारंभजसेमुमध्वगं २० कथंमतिस्तेवगतान्यथासतांकुलप्रसूतेकु
लदूषणंत्विदं बिभर्षिजारंयदपत्रपाकुलंपितुश्चभर्तुश्चनयस्यधस्तमः एवंब्रुवा
णंपितरंस्मयमानाशुचिस्मिता उवाचतातजामातातवैषभृगुनंदनः २२ शशंसा
पित्रेतत्सर्वंवयोरूपाभिलंभनं विस्मितःपरमप्रीतस्तनयांपरिषस्वजे २३ सोमे
नयाजयन्वीरंग्रहंसोमस्यचाग्रहीत् असोमपोरप्यश्विनोःच्यवनःस्वेनतेजसा हं
तुंतमाददेवज्रंसद्योमन्युरमर्षितः सवज्रंस्तंभयामासभुजमिंद्रस्यभार्गवः २५ अ
न्वजानंस्ततःसर्वेग्रहंसोमस्यचाश्विनोः भिषजावितियत्पूर्वंसोमाहुत्याबहिःकृतौ २६
उत्तानबर्हिरानर्तोभूरिषेणइतित्रयः शर्यातेरभवन्पुत्राआनर्ताद्रेवतोभवत् २७ सो
न्तःसमुद्रेनगरींविनिर्मायकुशस्थलीं आस्थितोभुंक्तविषयानानर्तादीनरिंदम २८

स्तत्त्वाणमेवमस्त्वर्यस्यसंबंधः २१ २९ विषयान्देशान् अभुंक्त अपालयत् २८ ॥

असोमयोः सोमपानरहितयोरपिवांयुवयोः सोमस्यग्रहं सोमपूर्णपात्रंग्रहीष्येदास्यामीति
युवांसोमेनयक्ष्यइत्यर्थः ऐंद्रवायवंग्रहाणांतेषामादिभूतत्वादिदेवतासंबंधानुपपत्तेर्ग्रहा
तीयोगपर्यवसायित्वात् १२ बाढमित्यभिनंद्यभवानस्मिन्निमज्जतामित्यूचतुः १३ ह्रदंप्रवे

ग्रहंग्रहीष्येसोमस्ययज्ञेवामप्यसोमयोः क्रियतांमेवयोरूपंप्रमदानांयदीप्सितं १२ बाढमित्यूचतुर्विप्रमभिनंद्यभिषक्तमौ निमज्जतांभवानस्मिन्ह्रदेसिद्धविनिर्मिते १३ इत्युक्तोजरयाग्रस्तदेहोधमनिसंततः ह्रदंप्रवेशितोऽश्विभ्यांवलिपलितविप्रियः १४ पुरुषास्त्रयउत्तस्थुरपीच्यावलिताप्रियाः पद्मस्रजःकुंडलिनस्तुल्यरूपाःसुवाससः १५ तान्निरीक्ष्यवरारोहासरूपान्सूर्यवर्चसः अजानतीपतिंसाध्वीअश्विनौशरणंययौ १६
दर्शयित्वापतिंतस्यैपातिव्रत्येनतोषितौ ऋषिमाम
न्त्र्ययतुर्विमानेनत्रिविष्टपम् १७

षितः तावपितमितिह्रदंगृहीत्वाप्रविष्टावित्यर्थः अश्विनौशरणंययौ युवांदृष्ट्वास्थिता
मन्यातिदर्शयतमितिप्रार्थयामासेत्यर्थः १६

उपयुक्तकारणा[illegible] कवेः पविंशोनामभवद्धिमात्स कविरितिवंधुभिः सहराज्यंविसृज्य १९ १९

श्री.
भाग.
नटी.
५

ब्रह्मभूयमवाप्त[illegible]स्यवंशः पुत्रः सुमतिः ततोभूतज्योतिः ततोवसुः २० ओघवतः प्रतीकस्तस्यो
घवती[illegible] २१ तदेवत्रिभिःश्लोकैः करूषधृष्टनृगामात्रयाणांवंशाउक्ताः नरिष्यंतस्य।

पृषध्रतोवनंगताद्दृष्ट्वाद्दावाग्निमुत्थितं तेनोपयुक्तकरणोब्रह्मप्रापपरंमुनिः १५ कविः
कनीयान्विषयेषुनिस्पृहोविसृज्यराज्यंसहबंधुभिर्वनं निवेश्यचित्तेपुरुषंस्वरोचिषंविवे
शकैशोरवयाःपरंगतः १६ करूषान्मानवादासन्कारूषाःक्षत्रियाजतयः उत्तरापथगोप्तारो
ब्रह्मण्याधर्मवत्सलाः १७ धृष्टाद्धार्ष्टमभूत्क्षत्रंब्रह्मभूयंगतंक्षितौ नृगस्यवंशःसुमतिर्भूत
ज्योतिस्ततोवसुः १८ वसोःप्रतीकस्तत्पुत्रःओघवानोघवत्पिता कन्याचोघवतीनामसुद
र्शनउवाहतां १९ चित्रसेनोनरिष्यंतादृक्षस्तस्यसुतोभवत् तस्यमीढ्वांस्ततःकूर्चइंद्रसेन
स्ततस्ततः २० वीतिहोत्रस्त्विंद्रसेनात्तस्यसत्यश्रवाअभूत् उरुश्रवाःसुतस्तस्यदेवदत्त
स्ततोऽभवत् २ ततोग्निवेश्योभगवानग्निःस्वयमभूत्सुतः कानीनइतिविख्यातोजा
तूकर्ण्योमहानृषिः २१ ततोब्रह्मकुलंजातमाग्निवेश्यायनंनृप नरिष्यंतान्वयःप्रो
क्तोदिष्टवंशमतःशृणु २२॥

वंशमाह चित्रसेनइतिसार्द्धैस्त्रिभिः ततइत्यादेर्यत्राधिकंस्यात्तत्राकंनयोंतइत्यादिपदंव्या
ख्येयंयत्रतन्यूनंतत्रपूर्वस्यवाक्यशेषत्वादितिव्याख्येयं २२॥

५

नः प्राह्मनेन ग्रंथेन त्वं कृपाणी खतत्स्निष्ठतो जागरणं वीरासनं देवव्रतं यस्य सः यत्नः अवहितः सन् गाः पालयामास ३ शार्द्दूलो व्याघ्रः ४ शालीना उडुगणा यस्मिन् तस्मिन् समये बभ्रो कपिलायाः गोः ६।

पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ३ एकदा प्राविशद्गोष्ठं शार्द्दूलो निशि वर्षति शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ४ एकां जग्राह बलवान् सा चुक्रोश भयातुरा तस्यास्तत्क्रंदितं श्रुत्वा पृषध्रो ऽनुससार ह ५ खड्गमादाय तरसा प्रलीनोडुगणे निशि अजानन्नछिनद्बभ्रोः शिरः शार्द्दूलशंकया ६ व्याघ्रोपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ७ मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ८ तं शशाप कुलाचार्यः कृतागसमकामतः न क्षत्रबंधुः शूद्रस्त्वं कर्मणा भविताऽमुना ९ एवं शप्तस्तु गुरुणा प्रत्यगृह्णात्कृतांजलिः अधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रियं १० वासुदेवे भगवति सर्वात्मनि परेमले एकांतित्वं गतो भक्त्या सर्वभूतसुहृत्समः ११ विमुक्तसंगः शांतात्मा संयताक्षोऽपरिग्रहः यदृच्छयोपपन्नेन कल्पयन्वृत्तिमात्मनः १२ आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः विचचार महीमेतां जडांधबधिराकृतिः १३ ॥

गोकामतो न ज[illegible]पयितुं वृक्णश्रवणः छिन्नकर्णः ७ व्युष्टायां प्रभातायां ८ क्षत्रबंधुरपि त्वं न भविता [illegible] इत्येति ९ १० ११ १२ १३

6

श्री० भाग० नटी० ८

वत्वर्थमनुपुत्रस्य नभगस्य कथोच्यते नतु नोऽस्यांबरीषस्य प्रकृतत्वात्प्रीतहतायतः १ नभगस्य
वंशमाह नभगस्यापत्यं नाभगः नाभागादंबरीषो महाभागवतोऽभूदिति वक्तुं नतद्देतत्वेनवं
शप्रवर्तकस्य नभगस्य निष्कपटं चरितं तेन च श्रीरुद्रप्रसादमाह यंततमित्यादिना ब्रह्म
चारिणं बहुकालं गुरुकुले वसंतं नैष्ठिकोऽभाविति मत्वा विभागसमये तस्मै भागमप्रका
श्यैव भ्रातरः सर्वे दायं विभज्य गृहीत्वा पश्चाद्गुरुकुलादागतं तं भागार्थिनं कविं विद्वांसं य
विष्ठं प्रति ते तातं पितरं दायं व्यभजन्नित्यर्थः २ एतदेव प्रश्नोत्तराभ्यां दर्शयति तत्र नाभागः

शुक० नाभागो नभगापत्यं यं ततं भ्रातरः कविं। यविष्ठं व्यभजन् दायं ब्रह्मचारिणमाग
तं १ भ्रातरोऽभाक्त किं मह्यं भजाम पितरं तव त्वां ममार्यास्तताभांक्षुर्मा पुत्रक तदादृथाः
२

एकदा हे भ्रातरः मह्यं किमभक्तं व्यभजन् कं भागं मह्यं पूर्वं प्रकल्पितवंतः भ्रातर आहुः त
दा विस्मृतमस्माभिरिदानीं तु तव पितरं गृहाणेत्यर्थः स च पितरमागत्याह ततहे तात न
आर्याः श्रेष्ठा मम त्वामभांक्षुः भागं चक्रुः मदीयो भागस्त्वमित्यर्थः पाठांतरे हे तात कि
मिदं ममाभांक्षुः भजाम पितरं तवेत्युक्तवंत आर्या त्वां मह्यं किमर्थं ददुरित्यर्थः पि
ताह हे पुत्रक ततस्तेषु कर्म मा आदृथाः प्रतारणमात्रैतैः कृतं तस्मिन्नाद
रं मा कार्षीः न त्वहं दायरूपभोगसाधनमित्यर्थः २

८

ककुद्मी ज्येष्ठो यस्मिं स्तत् विभुं ब्रह्माणं २९ न लब्धक्षणः वसरो येन ३० आद्यं ब्रह्माणं ३१ ते
त्वया हृदये कृताः सर्वे कालेन निरुद्धाः संहृताः ३२ त्रिनव सप्तविंशति चतुर्युगानि तैः विक

तस्य पुत्रशतं जज्ञे ककुद्मी ज्येष्ठमुत्तमं रेवतो रेवतीं कन्यां स्वामादाय विभुं गतः २९ क
न्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतं आवर्तमाने गांधर्वे स्थितोऽलब्धक्षणः क्षणं ३० त
दन्त आद्यमानम्य स्वाभिप्रायं न्यवेदयत् तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ३१ अ
हो राजन् निरुद्धास्ते कालेन हृदये कृताः तत्पुत्रपौत्रनप्तृणां गोत्राणि च न शृण्महे ३२
कालोऽभियातस्त्रिणव चतुर्युगविकल्पितः तद्गच्छ देवदेवांशो बलदेवो महाबलदेवो
महाबलः ३३ कन्यारत्नमिदं राजन् नररत्नाय देहि भोः भुवो भारावताराय भगवान् भू
तभावनः ३४ अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः इत्यादिष्टोऽभिवंद्याजं नृपः स्व
पुरमागतः ३५ त्यक्तं पुण्यजनत्रासाद् भ्रातृभिर्दिक्ष्ववस्थितैः सुतां दत्वानवद्यांगीं बला
य बलशालिने ३६ बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमं ३७ इति श्रीभाग
वते नवमस्कंधे तृतीयोध्यायः ३ ॥

ल्पितो विभक्तः यो देवस्यांशोऽस्ति ३४ तस्मै नररत्नाय देहि देवा ह भुवश्चेति ३५।३६ पुण्यजन
त्रासात् यक्षभयात् पूर्वमेव पुरं त्यक्तं भ्रातृभिः त्यक्तं ३७ इति श्रीभावार्थे नवमस्कंधे तृतीयोध्या

श्री.
भाग.
नवी.
९

इष्टस्य मनोर्वाक्यं यत्तवास्तुगतमित्यस्य उच्छिष्टमुच्चरितं किंचिदिति द्वाभ्यां ब्रुवे अथैष नाभागो वै रु-
द्र इति श्रुतस्य किं कर्मदेवईश्वरः सर्वमर्हतीति किं पुनर्यज्ञावशिष्टमित्यर्थः ८ ॥ श्रीरुद्र आह
यत्त इति इदमाख्यानं श्रुतिप्रसिद्धं तथा हि बह्वृचब्राह्मणे नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वा-
सन्तं भ्रातरो निरभजन्नमो ब्रवीदित्यादि ९ ॥ अस्याख्यानस्य स्मरणे फलमाह य एतदिति ।

यत्ते वास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति ८
नाभागस्तं प्रणम्याह तवेश किल वास्तुकं इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये ९
यत्ते पितावदद्धर्मं त्वं च सत्यं प्रभाषसे ददामि ते मन्त्रदृशो ज्ञानं ब्रह्म सनातनं १० गृहा-
ण द्रविणं दत्तं मत्सत्रपरिशोषितं इत्युक्त्वान्तर्हितो रुद्रो भगवान् धर्मवत्सलः ११ य एत-
त्संस्मरेत्प्रातः सायं वा सुसमाहितः कविर्भवति मन्त्रज्ञो गतिं चैव तथात्मनः १२ नाभा-
गादम्बरीषोऽभून्महाभागवतः कृती नास्पृशद्ब्रह्मशापोऽपि यं न प्रतिहतः क्वचित् १३
राजोवाच भगवन् श्रोतुमिच्छामि राजर्षेस्तस्य धीमतः न प्राभूद्यत्र निर्मुक्तो ब्रह्मदण्डो दुर-
त्ययः १४

आत्मनो गतिं च प्राप्नोतीति शेषः १२ क्वचिदपि न प्रतिहतो ब्रह्मशापोऽपि ब्राह्म-
णनिमित्तः कृत्यानलोऽपि यं नास्पृशत् अतो सो महाभागवतः अत एव कृती पुण्यवान् १३
तस्य श्रोतुमिच्छामि चरितमिति शेषः ब्रह्मदण्डः कृत्यानलः न प्राभूत न समर्थो बभूव १४

९

तस्यापि तैर्भागत्वेन दत्तो ऽहं तव जीवनोपायं उपदेक्ष्यामीत्याह इमइति सूक्ताभ्यां द्वाभ्यां ऋमित
वः षडहो भवति षष्ठः षडहो भवतीति विदिते षुषडहेष्वावर्तमानेषु षष्ठे षष्ठमहः कर्मीयेम
प्राप्य कर्माणि तदनुष्ठाने स्वमेधसोपि ते सूक्तविशेषाज्ञानेन मुह्यंतिक वेदे विद्वन्तान्महात्म
नोपितं मान्यरोहमिति वयेयसेनुदक्षिणायेतिच तं वैश्वदेवे हि सूक्ते संशयपायनतः क
र्माणि समाप्ते सति ते स्वर्यन्तः स्वर्गं गच्छंतः २४ स्वसत्र परिशेषितमवशिष्टमात्मनो धनं त

इमेअंगिरसः सत्रमासतेयत्स्वमेधसः षष्ठंषष्ठमुपेत्याहः कवेमुह्यंतिकर्मणि ३ तान्सं
शंसयसूक्ते द्वे वैश्वदेवे महात्मनः ते स्वर्यन्तो धनं सत्रेपरिशेषितमात्मनः ४ तत्संस्प
थस्ततो गच्छत्यास्तक्षत्रवान्यथा तस्मैदत्त्वाययुः स्वर्गं ते सत्रपरिशेषितं ५ तंकश्चि
त्स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः उवाचोत्तरतोभ्येत्य ममेदं वास्तुकं वसु ६ ममेदमृ
षिभिर्दत्तमिति तर्हि स्म मानवः स्यान्नौ ते पितरि प्रश्नः पृष्टवान् पितरं तथा ७

तत्त्वभ्यं दास्यन्ति स्वयं न सांनाना गच्छेतितयेत्यादि शुकवाक्यं यथावत्कृतवान् तत्रपरि
शेषितं मत्रावशिष्टं धनं ५ पुरुषः श्रीरुद्रः कृष्णदर्शने शरीरं यस्य सः वास्तुकं यज्ञभू
मिगतं धनं समेतस्वाच ६ तर्हि स्मतदेवममेदमिति मानवो नाभाग उवाच पुनस्सरुद्र उवाच नौ
आवयोः स्मिन्नादे ते पितरि प्रश्नः स्यादितिष्टष्टवानिति शुकोक्तिः ७

श्री.
भाग.
नटी.
९

कामंस्तुकंदनादिसेवादास्येनिमित्तेतत्रैश्वादस्वीकारानत्तकाम्यया विषयेच्छया कथंचकारउ
त्तमश्लोकजनाश्रयारतिर्यथाभवेत्तथाश्रनेननत्द्भक्तेषु चपरंभावंप्राप्तरसेनतत्स्फुटीकृतं २० स
र्वात्मेतिभावोभावनायस्मिन्नुत्तमात्मनः स्वस्यकर्मणांकलापंसमूहंभगवतिविदधत्समर्प
यन्तत्निष्ठैर्भगवन्नैर्विप्रैरभिहितः शिक्षितः सन्महीमशशासपालयामास अनेनाधिकृतधर्मो
ऽपियथावद्दर्शितः २१ किंचयत्राधिष्ठातारमीश्वरमश्वमेधैरीजेआराधयामासमहाविभूत्याउ

पादौहरेः क्षेत्रपदानुसर्पणे शिरोहृषीकेशपदाभिवंदने कामंचदास्येनतुकामका
म्यया यथोत्तमश्लोकजनाश्रयारतिः २० एवंसदाकर्मकलापमात्मनः परेऽधियज्ञेभ
गवत्यधोक्षजे सर्वात्मभावंविदधन्महीमिमांतन्निष्ठविप्राभिहितःशशासह २१ ईजेऽश्वमे
धैरधियज्ञमीश्वरंमहाविभूत्योपचितांगदक्षिणैः ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्य
भिस्रोतमसौसरस्वतीं २२ यस्यक्रतुषुगीर्वाणैः सदस्याऋत्विजोजनाः तुल्यरूपाश्चानि
मिषाव्यदृश्यंतसुवाससः स्वर्गोनप्रार्थितोयस्यमनुजैरमरप्रियः शृण्वद्भिरुपगाय।

पचितांगानिदक्षिणानियेषुतैः वसिष्ठादिभिर्हेतुभूतैर्विस्तृतैः धन्वनिनिर्जलदेशे निरुदकेसर
स्वतीमभिस्रोततस्याःप्रतिलोममित्यर्थः २२ किंचयस्ययस्यक्रतुषुसदस्यादयोगीर्वाणैः
सहरूपवर्णादिभिस्तुल्यरूपाव्यदृश्यन्त सादृश्यमितिवक्तुमेनानयः नचदेवानामनिमेषाभावा
त्केवलंतद्भेदःयतः अनिमिषाश्चव्यदृश्यन्तनिमिषंतीतितथाआश्चर्यंगणान्हकेषनतेषां।

श्रियंसंपदंविभवमैश्वर्यंमतुलंनिरुपमं १५ पुंसामतिदुर्लभमपितत्सर्वंस्वप्नवत्संस्तुतंनिरूपि
तमनुपादेयंमेनेतत्रहेतुः विभवस्यनिर्वाणंनाशंविद्वान्यत्येनविभवेनतन्नाशेनवापुमान्त
मोविशतिमोहेनिमज्जति १६ नन्वेवंज्ञानिनोपिविभवेविषिणोदृश्यंतेतत्राह वासुदेवइतिभावं
भक्तिंप्राप्तः येनभावेनइदंविश्वंलोष्टवदितितुच्छंस्मृतं १७ भक्तिमेवसर्वेंद्रियाणांभगवत्पर

शुकउवाच अम्बरीषोमहाभागःसप्तद्वीपवतीमहीं अव्ययांचश्रियंलब्ध्वाविभवंचातुलं
भुवि १५ मेनेतिदुर्लभंपुंसांसर्वंतत्स्वप्नसंस्तुतं विद्वान्विभवनिर्वाणंतमोविशतियत्पु
मान् १६ वासुदेवेभगवतितद्भक्तेषुचसाधुषु प्राप्तोभावंपरंविश्वंयेनेदंलोष्टवत्स्मृतं १७
सवैमनःकृष्णपदारविंदयोर्वचांसिवैकुंठगुणानुवर्णने करौहरेर्मंदरमार्जनादिषु
श्रुतिंचकाराच्युतसत्कथोदये १८ मुकुंदलिंगालयदर्शनेदृशौतद्भृत्यगात्रस्पर्शे।
गसंगमं घ्राणंचतत्पादसरोजसौरभेश्रीमत्तुलस्यारसनांतदर्पिते १९

त्कथनेनप्रपंचयति सवाइतित्रिभिः श्रुतिः श्रोत्रंअच्युतस्यसत्कथानामुदयेश्रवणेचकारे
त्यस्यसर्वत्रान्वयः १८ मुकुंदस्यलिंगानामालयानिस्थानानितेषांदर्शने दृशौनेत्रे श्रीमत्या
स्तुलस्यातत्पादसरोजेनयत्सौरभंतुलिनंतदर्पितेतस्मैनिवेदितेनान्नादौ १९

महाभिषेकविधिना पंचामृतस्नपनेन अम्बराकल्पैरलंकारैः ३१ अर्चयन्नस्यगगमाभावश्चार्थः
ब्राह्मणांश्च पूजयामासेति सिद्धार्थान् आप्तकामान् पूजितानपेक्षानपि ३२ रूप्यांघ्रीणां रूप्यखुराणां
पयःशीलादिसम्पदोपेतानां तासां न्यर्बुदानि षट् षष्टिकोटीः ३३ ३४ तर्हि तदा दुर्वासा अतिथिः

महाभिषेकविधिना सर्वोपस्करसंपदा अभिषिच्याम्बराकल्पैर्गन्धमाल्यार्हणादिभिः ३१
तद्गतान्तरभावेन पूजयामास केशवं ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ३२
गवां रुक्मविषाणीनां रूप्यांघ्रीणां सुवाससां पयःशीलवयोरूपवत्सोपस्करसंपदां ३३
प्राहिणोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमं ३४
लब्धकामैरनुज्ञातः पारणायोपचक्रमे तस्य तर्ह्यतिथिः साक्षाद् दुर्वासा भगवानभूत्
तमानर्चातिथिं भूयः प्रत्युत्थानासनार्हणैः ययाचेऽभ्यवहाराय पादमूलमुपागतः ३६
प्रतिनन्द्य स तां याच्ञां कर्तुमावश्यकं गतः निममज्ज बृहद्ध्यायन् कालिन्दीसलिले शुभे ३७
मुहूर्तार्धावशिष्टायां द्वादश्यां पारणं प्रति चिंतयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ३८
ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे यत्कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ३९

साक्षादागतोऽभूत् ३५ आनर्च अर्चितवान् अभ्यवहाराय भोजनाय ३६ आवश्यकं नैयमि।
कं माध्याह्निकं कर्म कर्तुं बृहद्ब्रह्म ३७ ३८ धर्मसंकटमेवाह यत् यत्र ब्राह्मणातिक्रमे दोषः
अधर्मः द्वादश्यामपारणेऽपि दोषः व्रतवैगुण्यं यत्कृत्वा यस्मिन् कृते ३९ ॥

आसीत्स्वर्गप्रार्थनशंकापियत् यस्मात्त्वजंदेहं दिपश्यत स्ततःकामा विषया न समर्द्धयंति नर्द्ध
यंति कथंभूताः स्वाराज्येन स्वरूपस्वत्वेन परिभाविता अतिशयिताः अतएव सिद्धानामपि दुर्लभाः
यानिति पाठे यान् मनुजान्स्वाराज्येन अपि द्वितीयांत पाठे मनुजानां विशेषणं यमिति पाठे यमनु
दीर्घपश्यतामिति पाठे सिद्धानां विशेषणं एवं भगवदाराधनपरस्य कामा अप्युपेक्षिता नेव चित्रमित्यु

न समर्द्धयंति यान्कामाः स्वाराज्यपरिभाविता दुर्लभा अपि सिद्धानां मुकुंदं हृदि पश्यतः २४
स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः स्वधर्मेण हरिं प्रीणन्सर्वान्कामाञ्छनैर्जहौ २५ गृहेषु दा
रेषु सुतेषु बंधुषु द्विपोत्तमस्यंदनवाजिवस्तुषु अक्षय्यरत्नाभरणायुधादिष्वनंतकोशे
ष्वकरोदसन्मतिं २६ तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहं एकांतभक्तिभावेन प्री
तो भृत्याभिरक्षणं २७ आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया युक्तः सांवत्सरं वीरो
द्वादशीव्रतं व्रतांते कार्त्तिके मासि त्रिरात्रं समुपोषितः स्नातः कदाचित्कालिंद्यां हरिं म
धुवनेर्च्चयत् २९ ॥

एसंदरति स इत्थमितिद्वाभ्यां २५ २६ ननु नैवं भूतो सौ कथं
प्रतिपत्तानजयत्तत्राह तस्मा इति २७ तदेवं तस्य वैराग्यादिकं हरिभक्तिश्चोक्ता ब्रह्मदंडो यत्र ना
प्रभाभूदिति यदुक्तं तदेव द्वादशीव्रतनिष्ठां कथयंस्तत्राह आरिराधयिषुरित्यादि यावदध्यायस
माप्ति अनहयसंवत्सरे २८ २९ ॥

॥ अरणमेषमाणाः शरणमीडन् अनितेनेनमः हरेश्वकात ५२ एतत्सर्वयस्य भ्रूभंगमात्रे
णातिरोभविष्यति कल्पकोशयावसानेतदपिकल्पहिपरार्द्धसंज्ञेकाले ॥ अतोवयंसर्वेयस्य
नियममाज्ञाप्रपन्नास्सन्तोलोकहितंयथाभवेत्तथैवतेनियमंमूर्ध्न्यर्पितंवहामः अतस्तस्मैनमो
हिरण्यगर्भवतित्वंनसमर्थोः इतिनिशेषः ५४ यत्नदेनित्यसंवेयात् श्रीरुद्रोपिप्रमाणवदेवय

दिशोनभः क्ष्मांविवरान्समुद्रान् लोकान्सपालांस्त्रिदिवंगतस्सः यतोयतोधावतितत्र
तत्रसुदर्शनंदुःप्रसहंददर्श ५३ अलब्धनाथासयदाकृतश्चित्त्रस्तचित्तोऽरणमेष
माणः देवंविरिंचंसमगाद्विधातस्त्राह्यात्मयोनेजिततेजसोमां ब्रह्मा० स्थानंमदीयं
सहविश्वमेतत्क्रीडावसानेद्विपरार्द्धसंज्ञे भ्रूभंगमात्रेणहिसन्दिधक्षोःकालात्मनोय
स्यतिरोभविष्यति ५२ अहंभवोदक्षभृगुप्रधानाःप्रजेशभूतेशसुरेशमुख्याः सर्वेवा
यंयन्नियमंप्रपन्नामूर्ध्न्यर्पितंलोकहितंवहामः ५४ प्रत्याख्यातोविरिंचेनविष्णुचक्रो
पतापितः दुर्वासाः शरणंयातः शर्वंकैलासवासिनं ५५ श्रीशंकरः वयंनतातप्र
भवामिभूम्नियस्मिन्परेऽन्येप्यजजीवकोशाः भवन्तिकालेनभवन्तिहीदृशाः सह

मितिवक्तृभिः भूम्निमहतिमहत्तमेवाह यस्मिन् । स्रशोयत्रवयंभ्रमामः ५६।
रेमेस्वरोप्रजाः ब्रह्मणः नपवनीवाले मोकोशाः उपाधिभूताब्रह्मांडविग्रहाईदृशाहृश्यमा
नब्रह्मांडप्रमाणाअन्येपिभवन्तिनभवन्तिनश्यन्तिवयंत्रयश्चब्रह्मांडेश्वलोकेशाभिमानिनो

एवं द्विजैः सह विचार्य विप्रैर्ज्ञात्वेति श्रेयसेति केवलेन तु जलसीपत्ररहितेन व्रतस्य पारणं समाप्तिम्
तदशितं नेति वा द्विजाः श्रुतिः तत्रैवाशितं नैवानशितमिति ४० प्रत्यवेक्ष्य प्रत्यैक्षत ४१ प्रचलत्कंपमा

श्रेयसा केवलेनापकरिष्ये व्रतपारणं प्राह वचनं विप्राश्च अशितं नाशितं च तत् ४२ इत्य
यः प्राप्य राजर्षिः स्थित यन्मनसाम्बुतं प्रत्याचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ४३ दुर्वासा
यमुनाकूलात्कृतावश्यक आगतः राज्ञाभिनंदितस्तस्य बुबुधे चेष्टितं धिया ४४ मन्युना
प्रचलद्गात्रो भ्रुकुटीकुटिलाननः बुभुक्षितश्च सुतरां कृतांजलिमभाषत ४५ अहो अस्य नृ
शंसस्य श्रियोन्मत्तस्य पश्यत धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ४६ यो मामति
थिमायातमातिथ्येन निमंत्र्य च अदत्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलं ४७ एवं ब्रुवाण
उत्कृत्य जटां रोषविदीपितः तया स निर्ममे तस्मै कृत्यां कालानलोपमां ४८ पतंतीं ज्वल
तामसिहस्तां पदा भुवं वेपयंतीं समुद्वीक्ष्य न चचाल पदान्नृप ४९ प्राग्दिष्टं भृत्यरक्षा
यां पुरुषेण महात्मना ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः तदभिद्रवदुद्वीक्ष्य स्वप्र
यासं च निष्फलं दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ५१ तमन्वधावद्भगवद्रथांग
दावाग्निरुद्धतशिखो यथाहिं तथानुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः प्रससार मे
रोः ५२ ॥

नेगात्रं यस्य भ्रुकुटीभ्यां कुटिलमाननं यस्य ४५ ५० क्रुद्धमहिं पावको दावाग्निरिव स्व
प्रयासं च निष्फलमुद्वीक्ष्य ५१ अनुषक्तं पृष्ठतः सक्तं मेरोर्गुहां विविक्षुः प्रससार धावत ५२ ॥

श्री॰ भाग॰ नव॰ ६५

न आशासे न स्पृहयामि ६४ ये मद्भक्तास्मैं परलोकं हित्वा ६५ ६६ प्रतीतं प्राप्तमपि ६७ ६८
आत्मनस्तवैव अभिचारो हिंसा यतो भूतमेव यातु ६९ अशिवमनर्थं तपोविद्यासंपन्नस्य

नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना श्रियंचात्यंतिकीं ब्रह्मन्येषांगतिरहंपरा ६४
येदारागारपुत्राप्तान्प्राणान्वित्तमिमंपरं हित्वामांशरणंयाताः कथंतांस्त्यक्तुमुत्सहे ६५
मयिनिर्बद्धहृदयाः साधवः समदर्शनाः वशेकुर्वंतिमांभक्त्यासत्स्त्रियः सत्पतिंयथा ६६
६६ मत्सेवयाप्रतीतंचसालोक्यादिचतुष्टयं नेच्छंतिसेवयापूर्णाः कुतोन्यत्कालविद्रु
तं ६७ साधवोहृदयंमह्यंसाधूनांहृदयंत्वहं मदन्यत्तेनजानंतिनाहंतेभ्योमनागपि ६८
उपायंकथयिष्यामितवविप्रशृणुष्वतत् अयंह्यात्माभिचारस्तेयतस्तंयातुवैभवान् ६९
साधुषुप्रहितंतेजः प्रहर्तुः कुरुतेशिवं तपोविद्याचविप्राणांनिःश्रेयसकरेउभे ७० ते
एवदुर्विनीतस्यकल्पेतेकर्तुरन्यथा ब्रह्मंस्तद्गच्छभद्रंतेनाभागतनयंनृपं ७१ क्षमा
पयमहाभागंततःशांतिर्भविष्यति इतिश्रीभागवतेनवमस्कंधेचतुर्थोध्यायः ४

वि

ममकथमनर्थः समजनीतिमाविस्मयंकार्षीरित्याह तपइति ७० नाभागतनयमंबरीषम
७१ ७२ इतिभावार्थदीपिकायांनवमस्कंधेनामचतुर्थोध्यायः ४ ॥

17

नत्वं सर्वेत्तस्तव भ्रमः ऊतत्तल्याह अहमिति ५७ पारदर्शिनः सर्वेत्ताअपिपयस्मायां नविमः
५८ हेस्तता मीशितमा अपाहि ६१ अपराधं निवेदयन् प्रार्थयते अजानतेति अचंडः ऽवंश्च प

अहं सनत्कुमारश्च नारदो भगवानजः कपिलोपान्तरतमो देवलो धर्म आसुरिः
५७ मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शिनः विदाम न वयं सर्वे यन्मायां मायया
वृताः ५८ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः तमेव शरणं याहि हरिस्ते शं विधा
स्यति ५९ ततो निराशो दुर्वासाः पदं भगवतो ययौ वैकुंठाख्यं यदध्यास्ते श्रीनिवासः
श्रिया सह ६० संदह्यमानो जितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः आहाच्यु
तानंत सदीप्सित प्रभो कृतागसं मावहि विश्वभावन ६१ अजानता ते परमानुभाव
कृतं मयाघं भवतः प्रियाणां विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारको
पि ६२ श्रीभगवानुवाच अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज साधुभिर्ग्रस्तहृदयो भ
क्तैर्भक्तजनप्रियः ६३

वितिनिः कृतिं न पश्यामीति चेत्तत्राह यस्य तव नाम्नि कीर्ति
तेन नरकस्योपि मुच्येत ततन वक्तिम शक्यमिति भावः ६२ ६३ ॥

श्री.
भाग.
नवी.
२१

अष्टमे रोहितस्यान्वयो वंशो यत्राभवन्नृपः सगरः कपिलोऽत्रैव पानिर्दग्ध्याय सा सुतवः १ चंप
स्तस्मादभूद्येन चंपापुरी विनिर्मिता अतः पंचात्सुदेवः १ हृता भूर्यस्य २ और्वेणा ऋषिणा
आत्मानं देहं प्रजावंतं सगर्भं ३ गरो विषं तेन गरेण सहैव जाता ४।१ गुरुवाक्येन प्रवेन।

शुक उवाच हरितो रोहितसुतश्चम्पस्तस्माद्विनिर्मिता चंपापुरी सुदेवोऽतो विजयो य
स्य चात्मजः १ भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि बाहुकः सोऽरिभिर्हृतभूराजा सभा
र्यो वनमाविशत् २ वृद्धं तं पंचतां प्राप्तं महिष्यनुमरिष्यती और्वेण जानतात्मानं प्र
जावंतं निवारिता ३ आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽन्धसा सह सह तेनैव संजातः
सगराख्यो महायशाः ४ सगरश्चक्रवर्त्यासीत्सागरो यत्सुतैः कृतः यस्तालजं
घान्यवनाञ्छकान्हैहयबर्बरान् ५ नावधीद्गुरुवाक्येन चक्रे विकृतवेषिणः मु
ण्डाञ्छ्मश्रुधरान्कांश्चिन्मुक्तकेशार्द्धमुण्डितान् ६ अनंतर्वाससः कांश्चिदबहिर्वाससो
परान् सोऽश्वमेधैरयजत सर्ववेदसुरात्मकं ७ और्वोपदिष्टयोगेन हरिमात्मानमी
श्वरं तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः सुमत्यास्तनया दृप्ताः पितुरादेशका
रिणः हयमन्वेषमाणास्ते समंतान्न्यखनन्मही ९ प्रागुदीच्यां दिशि हयं ददृशुः क
पिलान्तिके पश्वानिदर्शोऽत्रात्मो

नकांश्चिदर्द्धेतेव विकृतवेषिणाश्चक्रे तदेवाह
मुंडानिति मुक्तकेशानर्द्धमुंडितांश्च ६ और्वोपदिष्टो योगउपायः तेनात्मानमीश्वरं वासु
देवमयजत ८ तस्यद्वेभार्ये सुमतिः केशिनी च तत्र सुमत्याः पुत्राणां प्रभावमाहत्वेवाह

२१ इयमितिविधिः १ पञ्चविंशति १८

२२ वरुणेन स्वकर्मसु दंडं यस्य महात्मकथायस्य सः आत्मवान् जमदग्निरध्वर्युरभूत् २२ वसिष्ठोब्
ह्माभूत् आयास्यो मुनिः सामग उद्गाता प्रभृदिनर्थः २४ २१ उपविष्टान् विश्वामित्र सत्तावोनप्र
संगेच मविदत्तांगतिं ज्ञानेनामेव गतिमाह सार्द्धाभ्याम् मनः पृथिव्यां धारयन् २६ ज्ञानकलाध्या
नात याज्ञत्तान विर्दहन् २२ तांचहित्वा मुक्तात्मस्कंधन स्त्यावित्मन्वयः मनोमूलोहि संसारः

षष्ठे संवत्सरे तत्र चरित्वा रोहितः पुरं उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतं २१ शुनः
शेफं पशुं पित्रे प्रदाय समवदत ततः पुरुषमेधेन हरिश्चन्द्रो महायशाः २२ मुक्तोदरो
यजद्देवान् वरुणादीन्महत्कथः विश्वामित्रोभवत्तस्मिन्होता वाध्वर्युरात्मवान् २२ जमद
ग्निरभूद्ब्रह्मा वसिष्ठोयास्य सामगः तस्मै तुष्टो ददाविन्द्रः शातकौम्भमयं रथं २४ शुनःशे
फस्य माहात्म्यमुपरिष्टात्प्रचक्षते सत्यसारं धृतिं दृष्ट्वा सभार्यस्य च भूपते २५ विश्वा
मित्रोभृशं प्रीतो ददावविहतां गतिं मनः पृथिव्यां तामद्भिस्तेजसापोनिलेन तत् खेवा
युं धारयंस्तच्च भूतादौ तं महात्मनि तस्मिन् ज्ञानकलां ध्यात्वा तयाज्ञानं विनिर्दहन् २७
हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबंधनः २८ ३

मनश्चान्नमयं अन्नमयं हि सोम्य मन इति श्रुतेः अतोन्नशब्दवाच्यायां पृथिव्यां मनो धारयन् एकी
कुर्वन् तां पृथिवीमद्भिरेकीकुर्वन् अपस्तेजसा तत्तेजो निलेन तं च भूतादिमहंकारं महात्मनि
महत्तत्वे तस्मिन् विषयाकारव्यावर्त्तं ज्ञानफलां ज्ञानांशमात्मनस्तेन ध्यात्वा तया ध्यानवृत्ति रू
पया आत्मावरकमज्ञानं विनिर्दहन् निर्वाणसुखसंविदा तां च हित्वा मुक्तबंधनः सन् अनिर्दे

श्रीभागवते नवमस्कंधे ७

प्रयतप्रतर्क्येणोक्तं भावितसंग्रहणात स्थौ २८ इति नवमे सप्तमः

श्री·
भाग·
नटी·
२३

तस्य कथामाह चतुर्भिः असमंजसः पुरा पूर्वजन्मनि योगी सन् संगाद्धेतोः योगाद्विकंपितश्चा
लितः १९ अतः इदानीं जातिस्मरः सन् संगपरिहाराय जनमुद्वेजयन् लोके गर्हितं ज्ञातीनां च वि
प्रियं कर्माचरन् क्रीडतो बालान् सरय्वां प्रास्यत् इति पदद्वयोरन्वयः २० एवं विधं वृत्तं कर्म यस्य
सः २१ २२ पितृव्यखातमनु यः पंथाः तेन यो भस्मांतिः भस्मसमीपे २३ २४ अजानतोव जाने

असमंजस आत्मानं दर्शयन्नसमंजसं जातिस्मरः पुरा संगाद्योगी योगाद्विचालितः १९।
आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियं सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयञ्जनं २०
एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै योगैश्वर्येण बालांस्तान्दर्शयित्वा ततो ययौ
अयोध्यावासिनः सर्वे बालकान्पुनरागतान् दृष्ट्वा विसिस्मिरे राजन्राजा चाप्यन्वतप्य
त अंशुमांश्चोदितो राज्ञा तुरगान्वेषणे ययौ पितृव्यखातानुपथं भस्मांति ददृशे ह
यं २४ तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजं अस्तौत्समाहितमनाः प्रांजलिः प्रणतो
महान् अंशुमानुः न पश्यति त्वां परमात्मनोजनो न बुध्यतेद्यापि समाधियुक्तिभिः २५

एवमुक्तं प्रपंचयंतितितुष्टाव षड्भिः दीप्यमानं अंशुमानेवमाशयः अजनः अजः ब्रह्मापि तावद्या
पि न पश्यति न च बुध्यते कथंभूतं आत्मना स्वस्मात्परे परमेश्वरे केवलैर्मिः समाधियुक्तिभिः।
समाधिनापि अपरोक्षेन न पश्यति युक्तिभिः परोक्षमपि सम्यङ् न बुध्यते तत्र हेतुः अपरैः अर्वाचीना
स्तु नस्त्वां पश्येम अर्वाचीनत्वे हेतुः तस्य ब्रह्मणः मनश्शरीरे च धीः सत्त्वतमोरजः कार्या

नुवंतोभियपुत्रषष्टिसहस्राणिपरिक्लेदकतयासंतियेषांउन्मिमेषलोचनोन्मीलनचकार ११२ के
विनकपिलस्यकोपाग्निनादग्धाइतिवर्णयंतितन्निराकरोति नेतिऊनइतिश्रुतआह सनयाम्
निसुद्धसत्वमूर्तेर्जगतःपवित्रशुद्धिकरस्यात्मायस्यतस्मिन्कथंविभाव्यते असंभावनायांदृष्टा
तःभुजोरजःस्वकथंसंभाव्यतइति ११ किंवायस्यायेनईरिताप्रवर्तितातस्यविपश्चितःसर्वज्ञस्य

हन्यतांहन्यतांपापइतिषष्टिसहस्रिणः उदायुधाअभिययुरुन्मिमेषतदामुनिः ११ स्वा
शरीराग्निनातावन्महेंद्रस्यतचेतसः महद्व्यतिक्रमहताभस्मसादभवन्क्षणात् १२
नसाधुवादोमुनिकोपभर्जितान्पैतृपुत्राइतिमन्यथामति कथंतुमोराघमयंविभा
मतेजगत्त्रयविज्ञात्मनिविरजोऽभवः ११ यस्यविताऽसोऽल्कमयीरत्वेहमोऽर्थयासुमनस्त्वलत्र
तेऽइत्थमयोभवार्णवंमग्नस्यपथ्यंविपश्चितःपरात्मभूतस्यकथंदृश्यम्स्मतिः २४ योसमनस
इत्युक्तःसकेशिन्यांन्पालजः तस्यपुत्रोंऽशुमान्नामपितामहहितेरतः २५

कथंदृश्यम्स्मतिः अविमि
त्रादिभेदःदृष्टिः २४ तदेवंस्वमताःपुत्रेष्वसत्सुकेशिन्याःपौत्रेणाथःसमानीतःपितृव्योऽ
रणप्रयत्नकृतइतिदर्शयितुमाह योसमंजसइतिविक्रमः केवलमस्तेःवक्ष्यतनस्तुसतनसंभव
तीतिकेशिन्याःसतःदेवजनतमिवप्रतीनवारयितितस्यवल्पयमात्मनादेहजातः २५

श्री. भाग. नटी. २५

तस्मात्हे प्रशांतत्वां पुराणं पुरुषं केवलं नतं नामेत्यन्वयः पुराणं पुरुषं हेतुः मायया गुणाः कर्मा
णि विश्वसृष्ट्यादीनि लिंगानि च ब्रह्मादिरूपाणि यस्य तं प्रशांतत्वे हेतुः सदसत्ज्ञां कार्यका
रणाभ्यां वा विमुक्तं अतः अनामरूपं न कृतनामरूपं सूर्यं किं तत्ज्ञानोपदेशाय गृहीतः प्र
कटितो देहः शुद्धसत्वमूर्तिर्येन तं यद्वा हे प्रशांतमायेति हे अगुणेति संबोधयः कर्म स्पष्टं।

प्रशांतमायागुणकर्मलिंगमनामरूपं सदसद्विमुक्तं ज्ञानोपदेशाय गृहीतदेहं न
मामहे त्वां पुरुषं पुराणं २३ त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु भ्रमंति कामलो
भेर्ष्यामोहविभ्रांतचेतसः २४ अद्य नः सर्वभूतात्मन्कामकर्मेंद्रियाशयः मोहपाशो दृ
ढश्छिन्नो भगवंस्तव दर्शनात् २५ इत्थंगीतानुभावस्तं भगवान्कपिलो मुनिः अंशु
मंतमुवाचेदमनुगृह्य धिया नृप २६॥

दिकार्यैर्लिंगानि यस्येति योज्यं यद्वा प्रशांतमायागुणा इत्यो यस्मिन्निमेकमेव पदं ॥ त्व
भागे पश्याय ते त्वन्मायेति द्वाभ्यां कामादिभिर्विभ्रांतानि चेतांसि येषां त इमे सर्वे गृहादिषु भ्रमं
ति २४ हे सर्वभूतात्मन् अस्माकं तत्कापर्ये वर्तितानुत्वद्दर्शनादतिदृष्टेपि मोहमयः।
पाशश्छिन्नः कथंभूतः कामादीनामाशयः आश्रयः तत्प्रसादेन कृतार्थाः स्मीत्यर्थः २५

२५

23

अथ ये तर्हि किं पश्यंति तत्राह येदेहभाजस्ते त्वस्मिन्नमकस्थितमपितेन विडुः किंतु गुणानेव वि
पश्यंति अथवा न गुणानपि अपितत्तमप्रवपश्यंति यतस्त्रिगुणा बुद्धिरेव प्रधानं येषां अतो
वहिरेवप्रकाशो ज्ञानं येषां बुद्धिप्रवर्तनतया ज्ञाग्रत्स्वप्नयोर्विषयान्पश्यंति सुषुप्तौ तमप्रवकेवलं
न तु निर्गुणं त्वां ज्ञानेनेतीति सर्वत्र हेतुः यद्यतः यस्त्वत्त्वमायया मोहितं चेतो येषां ते २१ न यास्मदं

येदेहभाजस्त्रिगुणप्रधाना गुणानिपश्यंत्युतनात्मथा यन्मा
यया मोहितचेतसस्ते विडुः स्वसंस्थं न वहिः प्रकाशाः २३।
त्वां त्वामहं ज्ञानघनं स्वभावं प्रध्वस्तमायागुणभेदमोहैः सनं
दनाद्यैर्मुनिभिर्विभाव्यं कथं विमूढः परिभावयामि २४

विचारेणाज्ञास्यामीति चेत्तत्राह त्वां त्वामहं विमूढः कथं विभावयामि विचारयामि कथंभूतं
ज्ञानघनं शुद्धज्ञानमूर्तिं स्वत एव प्रध्वस्तो मायागुणनिमित्तो भेदमोहो येषां ते विभाव्यं विविं
त्यमयं भावः ज्ञानघनत्वान्न विषयस्त्वं विचारविषयत्वेपि मायागुणैरभिभूतोहं न विचारेस

आद गंगा को ऽपि गगनात्पतंत्या मे वेगं धारयिता धारयिष्यति ४ किंच आमृजंति त्वा लक्षिष्यं
ति तत् अघं क्व यो विचिंत्यतां ५ हरंति हरिः अघं भिनत्तीत्यघभित् आत्मा कथंभूतः यस्मिन्निदं
विश्वमोतं ऊर्ध्वं तंतुषु शाटीव यथा प्रोतं च तिर्यक्तंतुषु पट इव सर्वथा ६ रुद्रो वेगं धार

कोपि धारयिता वेगं पतंत्या मे महीतले अन्यथा भूतलं भित्वा नृप यास्ये रसातलं ४
किंचाहं भुवं न यास्ये नरा मय्यामृजंत्यघं मृजामि तदघं क्वाहं राजंस्तत्र विचिंत्यतां ५
भगीरथ उ० साधवो न्यासिनः शांता ब्रह्मिष्ठा लोकपावनाः हरंत्यघं तेंगसंगात्तेष्वास्ते
ह्यघभिद्धरिः ६ धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणां यस्मिन्नोतमिदं प्रोतं वि
श्वं शाटीव तंतुषु ७ इत्युक्त्वा स नृपो देवं तपसातोषयच्छिवं कालेनाल्पीयसा रा
जंस्तस्येशः समतुष्यत तथेति राज्ञाभिहितं सर्वलोकहितः शिवः दधारावहितो
गंगां पादपूतजलां हरेः ८ भगीरथः स राजर्षिर्निन्ये भुवनपावनीं यत्र स्वपितॄ
णां देहा भस्मीभूताः स्म शेरते ९ रथेन वायुवेगेन प्रयांतमनुधावती देशान्पुनं
ती निर्दग्धानासिंचत्सगरात्मजान् ११

धारयिष्यतीत्यर्थः ७ इति एवं गंगामुक्त्वा तत्कृते इति पाठे आवयितेत्यर्थः ८ राज्ञाभिहितं
तथेत्यंगीकृत्य हरेः पादेन पूतं जलं यस्याः ९ १० ॥

अंशुमंल्लब्धापितामहान्तं प्रत्याहर इमे चेति ३० परिक्रम्येति स्पष्टोक्तिः ३१.३२ इति श्रीभावार्थे नवमेऽष्ट
मः ८ नवमे त्वंशुमतो वंश्याः तेऽहं गङ्गावतीर्वर्ण्यते गङ्गा भूतलमानिन्ये यस्तपोभि भगीरथा १ य
थाऽसगरः पौत्राय राज्यं दत्वा तपस्तेपे तथा अंशुमांश्च स्वपौत्राय राज्यं दत्वा महान्तं तपस्तेपे इत्यर्थः

श्रीभगवानुवाच अश्वोऽयं नीयतां वत्स पितामहपशुस्तव: इमे च पितरो दग्धा गङ्गाम्भोऽर्ह
न्ति नेतरं ३० तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् सगरस्तेन पशुना क्रतुशेषं समाप
यत् ३१ राज्यमंशुमति न्यस्य निःस्पृहो मुक्तबंधनः और्वोपदिष्टमार्गेण लेभे गतिमनुत्त
माम् ३२ इति श्रीभागवते नवमे सगरोपाख्याने अष्टमोऽध्यायः ८ शुक उ० अंशुमांश्च
तपस्तेपे गङ्गानयनकाम्यया कालं महान्तं नाशक्नोत्ततः कालेन संस्थितः १ दिलीप
स्तत्सुतस्तद्वदशक्तः कालमेयिवान् भगीरथस्तस्य सुतस्तेपे स सुमहत्तपः २ दर्श
यामास तं देवी प्रसन्ना वरदास्मि ते इत्युक्तः स्वमभिप्रायं शशंसावनतो नृपः ३

ति चकारस्यार्थः नाशक्नोत् गङ्गामानेतुमिति शेषः संस्थितः मृतः १ कालं मृत्युमुपेयिवान् प्राप्त
वान् तं प्रत्यात्मानं दर्शयामास ते वरदास्मीति गङ्गयोक्तः सन् स्वमभिप्रायं पूर्वजोद्धरणं शशं

श्री. भाग. नवी. २९

म्हगयांचरनकंचिद्राक्षसंजघान तस्यभ्रातरंमुमोच २० सभ्राताअयंमद्वेष्टासूदःपाचकःत
द्रूपधरःसन्राज्ञोगृहेवर्तमानः २१ अभक्ष्यमंजसाविलोक्यपवेनरमांसमवदीरण २२
वसिष्ठएवंतेशापंद्वादशवर्षिकंचक्रे २३ रुशतीरुग्राःअपःपादयोर्जहौनान्यत्रतत्रहेतुः

शुकउवाच सौदासोम्हगयांकिंचिच्चरन्रक्षोजघानह मुमोचभ्रातरंसोथगतःप्र
तिचिकीर्षया २० संचिंतयदघंराज्ञःसूदरूपधरोगृहे गुरवेभोक्तुकामायपक्त्वा।
निन्येनरामिषं २१ परिवेक्ष्यमाणंभगवान्विलोक्याभक्ष्यमंजसा राजानमशपत्
क्रुद्धोरक्षोह्येवंभविष्यसि २२ रक्षःकृतंतद्विदित्वाचक्रेद्वादशवार्षिकं सोप्यपो।
ंजलिमादायगुरुंशप्तुंसमुद्यतः २३ वारितोमदयंत्यापोरुशतीःपादयोर्जहौ।
दिशःखमवनिंसर्वंपश्यन्जीवमयंन्रपः २४ राक्षसंभावमापन्नःपादेकल्मष
तांगतः व्यवायकालेददृशेवनौकोदंपतीद्विजौ २५

देशाइतिअनेनमित्रसहत्वमपिदर्शितंमित्रस्यवाचःसहनात् २४ तदेवंरक्षस्त्वेकल्मा।
षांघ्रित्वेचकारणमुक्त्वास्वकर्मणानप्रत्यरुइतियद्उक्तंतत्प्रपंचयति व्यवायकालइत्या
दिनाकर्मणाअप्रजइत्यंतेनवनमोकोनिवासोययोस्तौ २५

प्रसंगाद्गंगामाहात्म्यमाहचतुर्भिः यस्याजलस्पर्शमात्रेणतत्रकेवलंदेहभस्मभिरेवनसा।
क्षाद्ब्रह्मणाख्यकृतेनदंडेनहताअपितांश्रद्धयासेवितेतितिविशेषः १२ तमर्थंप्रपंचयतिभस्मीभूते

यज्जलस्पर्शमात्रेणब्रह्मदंडहताअपि सगरात्मजादिवंजग्मुःकेवलंदेहभस्मभिः १२
भस्मीभूतांगसंगेनस्वर्याताःसगरात्मजाः किंपुनःश्रद्धयादेवींयेसेवंतेधृतव्रताः १३ न
ह्येतन्महदाश्चर्यंस्वर्धुन्यायदिहोच्यते अनंतचरणांभोजप्रसूतायाभवच्छिदः १४ स
न्निवेश्यमनोयस्मिन्श्रद्धयामुनयोमलाः त्रैगुण्यंदुस्त्यजंहित्वासद्योयातास्तदात्मतां
१५ श्रुतोभगीरथाज्जज्ञेतस्यनाभोपरोभवत् सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोभव
त् १६ ऋतुपर्णोनलसखोयोश्वविद्यामयान्नलात् दत्वाक्षहृदयंचास्मैसर्वकामस्तु
तत्सुतः १७ ततःसुदासस्तत्पुत्रोदमयंतीपतिर्नृपः आहुर्मित्रसहंयंवैकल्माषांघ्रिमुत
क्वचित् १८ वसिष्ठशापाद्रक्षोभूदनपत्यःस्वकर्मणा राजोवाच किंनिमित्तोगुरोः।
शापःसौदासस्यमहात्मनः एतद्वेदितुमिच्छामःकथ्यतांनरहोयदि १९ ॥

नांगेनयःसंगःतेन १३।१४ अनंतस्यविशेषणं सन्निवेश्येति त्रैगुण्यंदेहसंबंधः १५ नलस्य
सखायात्प्राप्तः तत्सुतः ऋतुपर्णस्यसुतः १७ ततस्तत्सुतःसौदासः १८ नरहः नरहस्य १९

२८

द्विपिण्डं गर्भाधानकर्तारं ३४ आधानान्प्राक्तनप्रसंगस्मर्थाद्दर्शितः ३५ ३६ तदेवं कर्मणा
अप्रजः ३८ अविभ्रद्धारेणार्थः नव्यजायत नप्रसूत अतोवसिष्ठएवतस्याउदरमश्मना

एवंकरुणभाषिण्याविलपन्त्याअनाथवत् व्याघ्रःपशुमिवाखादत्सौदासःशापमो
हितः ३४ ब्राह्मणीवीक्ष्यदिधिषुंपुरुषादेनभक्षितं शोचन्त्यात्मानमुर्वीशमशपत्कु
पितासती ३५ यस्मान्मेभक्षितःपापकामार्तायाःपतिस्त्वया तवापिमृत्युराधानाद
कृतप्रज्ञदर्शितः ३६ एवंमित्रसहंशप्त्वापतिलोकपरायणा तदस्थीनिसमिद्धे
ऽग्नौप्रास्यभर्तुर्गतिंगता ३७ विशापोद्वादशाब्दान्तेमैथुनायसमुद्यतः विज्ञायब्राह्म
णीशापंमहिष्यासनिवारितः ३८ अतऊर्ध्वंसतत्याजस्त्रीसुखंकर्मणाप्रजः वसिष्ठ
स्तदनुज्ञातोमदयन्त्यांप्रजामधात् ३९ सावैसप्तसमागर्भमबिभ्रन्नव्यजायत ज
घ्नेऽश्मनोदरंतस्याःसोऽश्मकस्तेनकथ्यते ४० अश्मकान्मूलकोजज्ञेयःस्त्रीभिःपरि
रक्षितः नारीकवचइत्युक्तोनिःक्षत्रेमूलकोऽभवत् ४१

जघानसउत्पन्नःसतोऽश्मकः ४० स्त्रीभिःसंवृतोपरशुरामात्परिरक्षितः अतोनारीक
वचइत्युक्तः निःक्षत्रेसतितत्रवंशस्यमूलमभवत् अतोमूलकइतिप्रोक्तः ४१

अकृतार्थवत्दीनवत् २८ अकृतार्थं असमाप्तव्रतं २९ सर्वभूतानामात्मेति भावनया २९
आराधयितुमिच्छन्यज्ञ्ञैः सर्वभूतानामात्मभावेन भूतेषु स्थितमपि गुणैरंतर्हितं ब्रह्मेति सं
बंधः पाठांतरे तर्हितः सोयमित्यन्वयेणान्वयः ३१ भूणस्य श्रोत्रियस्य गर्भस्य सतः इति वा वृश्रो

